World Wide Journal of Multidisciplinary Research and Development




WWJMRD 2020; 6(10): 65-68
www.wwjmrd.com
*International Journal Peer Reviewed Journal Refereed Journal Indexed Journal Impact Factor MJIF: 4.25 E-ISSN: 2454-6615*

**कुलदीपसिहः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विद्यापीठम्

**Correspondence:**
**कुलदीपसिहः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विद्यापीठम्

# विवाहसंस्कारः

## कुलदीपसिहः

विवाहः गृहस्थजीवनस्य सन्तानपरम्परायाश्च वीजरूपक: । कन्याया: वरायदानं विवाहः इत्युच्यते । स तु विवाहः स्त्रीणां सर्वश्रेष्ठ: संस्कार: । पुरुषाणां कृते तु कन्यास्वीकार: उदवाह रिति कथ्यते । यद्यपि पुरुषाणां कृते सर्वश्रेष्ठः न भवति तथापि तेषां संस्कारकर्मसु अन्तर्भवति । स च विवाह याज्ञवल्क्यादिस्मृतौ अष्टधा प्रदर्शित: । अस्माकमत्र आलोच्यास्यायं विषय: विवाहरिति।
ब्राह्मचर्याश्रममनन्तरमेव द्विज: वेदः, व्रतानि उभयं वा समाप्य गुरवे यथाशक्तिमभिलषितं वस्तुं दत्वा तदनुज्ञया स्नायात्। स्नानमन्तरमेव विवाह: निर्दिष्टरिति । यथा योगीश्वरेणाह -

**अविप्लुतो ब्रह्मचर्य लक्षण्यां स्त्रीयमुद्वहेत्।**
**अनन्यपूर्विकां कान्ताससपिण्डां यवीयसीम्।।**

मनुनापि यत् उद्घोषितम् -

**गुरुणामनुमत: स्नात्वा समावृत्तो यथाविधिः।**
**उद्वहेत् द्विजो भार्या सर्वणां लक्षणान्विताम्।।**

गौतमेन एवमपि दर्शितं यत्- **"गृहस्थ: सदृशी भार्या विन्देतानन्यपूर्वायवीयसीम्।"** अर्थात अस्खलितब्रह्मचर्य लक्षण्यां नाम ब्राह्याभ्यन्तरलक्षणैर्युक्तां अनन्यपूर्विकां असपिण्डा सनीयां स्त्रीयमुद्वहेत्। विवाहे तत्र विशेष: दर्शित: योगीश्वरेण यथा –

**अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाः ।**
**पञ्चमात्सप्तमादुर्ध्वं मातृत:पितृतस्तथा: ।।**

असपिण्डया कन्याया सह विवाहस्य प्रशंसा मनुस्मृतौ दर्शित: यत् – असपिण्डा च या मातुरसगोत्रा च या पितुः ।

**असपिण्डाय वमातुरसगोत्रा यथा पितुः ।**
**सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुनो ।।**

गौतमेनापि एवमुल्लिखितं यत् –

**'असमानप्रवरैर्विवाहः'' ।**

पुनरपि तेनोक्तं यत् –

**'उर्ध्वं सप्तमात्पितृबन्धुभ्यो वीजीनश्च – मातृवन्धुश्च पञ्चमात्''**

एवं प्रकारेणकन्याग्रहण नियमानं प्रदर्श्य कन्यादाने पुन: वरनियमात्र चर्चित: ।
समावर्त्तनानन्तरं अयं संस्कारः अधुनाप्यन्येभ्यः संस्कारेभ्यः सर्वेभ्योऽधिकः प्रसिद्धः महत्त्वपूर्णः चास्ति। विवाहानन्तरमेव अन्येषामपि संस्काराणामवसरः भवति। **"अपत्नीकोऽयज्ञियो वै पुरुषः अपत्नीकस्य कर्मण्यनधिकारः"** । विवाह शब्दस्य व्युत्पत्तिः 'वि' उपसर्गपूर्वकं 'वह्' प्रापणे धातोः 'घञ्' प्रत्ययात्

जायते। धर्मशास्त्रे विवाहस्यानेके समानार्थकाः शब्दा लभ्यन्ते। यथा - उद्वाहः, परिणयः, पाणिग्रहणं, स्वीकरणम्, उपयमश्चेत्यादयः। तत्र वहनमेव वाहः। विशिष्टो वाहो विवाह उच्यते।

**विवाहस्य महत्वम्**

संस्काराणां मध्ये विवाहस्यात्यन्तमेव महत्त्वपूर्णं स्थानं वर्तते । वैदिकसाहित्ये विवह अपि यज्ञ एव अस्ति। अत एव विवाहः सम्पाद्य गृहस्थजीवने प्रवेशं कर्तव्यम् । तदभावे मानवः यज्ञहीनो भवति । तैत्तिरीयब्राह्मणे स्पष्टतया लिखितम्। यथा तैत्तिरीयब्राह्मणे -

**"अयज्ञियो वा एष योऽपत्नीकः॥ इति ॥**

एवमेव ऋणत्रयान्मुक्तिं विवाहं विना न सम्भवति। स्मृतय आश्रमव्यवस्थां पूर्णतया समर्थयन्ति । स्मृतिः दृढं प्रतिपादयति यद् ब्रह्मचर्याश्रमानन्तरम् अनिवार्यरूपेण विवाहो विधीयेते इति। यथा मनुस्मृतौ –

**चतुर्थमायुषो भागं वसित्वाद्यं गुरोः कुले।**
**द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ इति ॥**

स्मृतिषु आश्रमोऽयं भूरि भूरि प्रशंसितो वर्तते –

**गृहस्थ एव यजते, गृहस्थ एव तपते तपः।**
**चतुर्ण्णामाश्रमाणान्तु गृहस्थ एव प्रशस्यते॥**
**यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम्।**
**तथा गृहस्थमाश्रित्य सर्वे जीवन्ति जन्तवः ॥ इति ॥**

अत्र अपरस्याचार्यस्य वचनमस्ति यत् पत्नी धर्मार्थकामानां कारणम्। अपत्नीको नरः कर्मानः भवति। कामम्, स क्षत्रियो वैश्यो वा भवेत्। यो मानव इहलोके स्वर्गे चापि सुखमभिलषति, तेन गृहस्थाश्रमो नूनं सेवनीयः। सुस्पष्टमेव यत् प्राचीनकाले अकृतविवाहो हीनो मन्यते स्म। विवाहकर्म नैकैः कारणैः प्रशस्तमिति मन्यते स्म। तदानी विवाहो वैयक्तिकमहत्त्वापेक्षया पारिवारिको विषय आसीत्।

**विवाहस्योद्देश्यम्**

मनुः विवाहस्योद्देश्यं निरूपयन्नाह –

**उत्पादनमपत्यस्य जातस्य परिपालनम्।**
**प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥ इति ॥**

अनयोक्त्या धर्मसंस्कारत्वेन विवाहस्य विवेचनेन विवाहसंस्कारस्य त्रिविधमुद्देश्यं लक्ष्यते - धर्मकार्याणि, पुत्रप्राप्तिः, निसर्गजा रतिश्चेति। आचार्या एतेषु त्रिष्वपि आद्यं धर्मकार्यमेवोद्दिष्टवन्तः।
पुनश्च –

**अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा।**
**दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च हि ॥ इति ॥**

याज्ञवल्क्यस्तु विवाहेन द्विधा उद्दिशति - पुत्रपौत्रदिलाभः स्वर्गलाभश्चेति। धर्मकार्याणि अनुष्ठानेन स्वर्गप्राप्तिः सम्भाव्यते।

**लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः।**
**यस्मात्तस्मात् स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः॥ इति ॥**

**विवाहस्य भेदाः**

देशकालपरिस्थित्यनुसारं समये समये विवाहस्यानेके प्रकाराः प्रचलिताः। धर्मशास्त्रेषु प्राशस्त्याप्राशस्त्यविचारपुरस्सरम् अष्टौ प्रकाराः उद्धृताः। धर्मशास्त्रग्रन्थेषु विवाहस्येमेऽष्टौ भेदाः –

**ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः।**
**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥ इति ॥**

अष्टविवाहेषु ब्राह्मादिचतुष्टयं प्रशस्तं आसुरादिचतुष्टयं तु अप्रशस्तम् इति मन्यते। अत्र अष्टविवाहानां लक्षणं फलं च मनुयाज्ञवल्क्यशङ्खगौतमस्मृत्याद्यनुसारं वर्ण्यते।

**ब्राह्म विवाहः -**

अत्र मनु ब्राह्मविवाहस्य लक्षणविषये उच्यते –

**आच्छाद्य चर्चयित्वा च श्रुतिशीलवते स्वयम्।**
**आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः॥ इति ॥**

गौतमेन एवं प्रदर्शितम् –

**"ब्राह्मो विद्यावादित्रबन्धुशीलसंपन्नायाच्छाद्यालंकृताम्"**

योगीश्वरयाज्ञवल्क्येन विवाहस्य लक्षणं यथा विहितम ।

**'ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृतः ।**
**तत्र ब्राह्मविवाहेन तस्यां पत्न्यां जातः पुत्रः ।।'**

उभयतः पित्रादीन्दशपुत्रादींश्च दश आत्मानञ्चैकविंशं पुरुषं पूनाति। मनुस्मृतौ वचनमिद प्रमाणितं यथा –

**'दशपूर्वान् परान्वंश्यानात्मनंचैकविंशकम् ।**
**ब्राह्मीपुत्रः सुकृतकृन्मीयचेदेनसः पितृन् ।'**

योगीश्वरेणापि एवं विद्दितं यथा –

**'तज्जः पुनात्युभयः पुरुषानेकविशंतिम्' ।**

मनुस्मृतौ ब्राह्मविवाहफलं विषये उल्लिखितमस्ति । यथा –

**दश पूर्वान्परान्वंश्यानात्मानं चैकविंशकम्।**
**ब्राह्मीपुत्रः सुकृतकृन्मोचयेदेनसः पितृन् ॥ इति ॥**

दश पूर्वान्पित्रादीन्वंश्यान् परान्पुत्रादीन्दश, आत्मनं चैकविंशकं ब्राह्मविवाहपुत्रो यदि सुकृतकृद्भवति तदा पापान्मोचयति पित्रादीन्नरकादुद्धरति पुत्रादयश्च तस्य कुले निष्पापा जायन्त इति मोचनार्थः तेषामनुत्पत्तेः पापध्वंसस्याशक्यत्वात्।
स ब्राह्मभिधानो विवाहः यस्मिन्नुक्तलक्षणाय वरायाहूय यथाशकत्यालंकृता कन्या दीयते।
तस्या जातः पुत्र उभयतः पित्रादीन्दश पुत्रादींश्च दश, आत्मानं चैकविंशं पुनाति सद्वृत्तश्चेत्।

**दैव विवाहः –**

ज्योतिष्टोमे यज्ञे विधिपूर्वकं रुत्विजे कन्यामलंकृत्य प्रदानं दैवो विवाहः । तस्य लक्षणं याज्ञवल्क्यस्मृतौ यदुल्लिखितम् –

**''यज्ञस्य रुत्विजे दैव'' ।**

अत्र मनुना प्रोक्तम् –

**यज्ञे तु वितते सम्युगृत्विजे कर्म कुर्वते।**
**अलंकृत्य सुतादानं दैव धर्म प्रचक्षते ॥ इति ॥**

ज्योतिष्टोमादियज्ञे प्रारब्धे यथाविधि ऋत्विजे कर्मकर्त्रे अलंकृत्य कन्यादानं दैवं विवाहं मुनयो ब्रुवते।

**दैवोढाजः सुतश्चैव सत्प सत्प परावरान्।**
**आर्षोढाजः सुतस्त्रीस्त्रीन्षट् षट् कायोढजः सुतः। इति ॥**

गौतमेन एवं विहितं यत् –
अन्तवैधृत्विजे दानं देवीऽसंकृत्य इति । अनेन विधिना विवाहितायां पत्न्यामुत्पन्नः चतुर्दशपुरुषान् अर्थात् सप्तावरान सप्तपरान च पुनाति"।
यथाह मनुना –

**'देवोढाजः सुतश्चैव सप्त सप्त परावरान् ।**

अत्र याज्ञवल्क्यस्मृतिः –

**यज्ञस्थ ऋत्विजे दैव अदायार्षस्तु गोद्वयम्।**
**चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट् ॥ इति ॥**

स दैवो विवाहो यस्मिन्यज्ञानुष्ठाने वितते ऋत्विजे यथाशकत्यलंकृता कन्या दीयते।
यस्मिन् यज्ञानुष्ठाने यथाविधि ऋत्विजे कन्यालंकृत्त्वा कन्या दीयते सः दैव विवाहः इति उच्यते।

**आर्ष विवाहः -**
एकं गोमिथुनं द्वयं वा यझकार्यनिमित्तं वरादानीय विधिपूर्वकं कन्यादानमार्ष विवाहः । विवाहस्यास्य लक्षणं मनुना यत् परिकल्पितम् –

**एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।**
**कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते । इति ॥**

योगीश्वरेण याज्ञवल्क्येन वचनमिदं एवमुल्लिखितं यत् –

**'आदायार्षस्तु गोद्वयम्''**

गौतमेनापि एवं विहितम् –
**'आर्षगोमिथुनं कन्यावते दद्यात्''** विवाहेऽस्मिन् फलस्य कल्पनापि परिलक्ष्यिते ।
यथा मनुस्मृती –
"आर्षढाजः सुतस्त्रींस्त्रीन्ष्टषट कायोढजः सुतः अर्थात् आर्षविवाहेन संजातः पुत्रः पित्रादीन त्रिपुरुषान् पुत्रादीन् त्रिपुरुषान् आत्मानं च एवं सप्तपुरुषान् उद्धरतीति''।

**प्राजापत्य विवाहः –**
युवाम् वधूवारौ उभौ मिलित्वा धर्माचरणं कुरुत इत्युक्त्वा तथा वस्त्रालंकारादिभिः पूजयित्वा कन्यादानं प्राजापत्यो विवाहः ।
अत्र मनुः -

**सहोभौ चरतां धर्ममिति वाचानुभाष्य च।**
**कन्याप्रदानमभ्यर्च्य प्रजापत्यो विधिः स्मृतः॥ इति ॥**

सह युवां धर्म कुरुतमिति सुताप्रदानकाले वचसा पूर्व नियम्यार्चयित्वा यत्कन्यादानं स प्राजापत्यो विवाहः स्मृतः।
योगीश्वरेण याज्ञवल्क्येन –

**'इत्युक्त्वा चरतां धर्मसहता दीयतेऽर्थिने'**

पुनश्चत्र गौतमेन प्रतिपादितं यत् –

**"संयोगमन्त्रं प्राजापत्ये सहधर्मश्चर्यतामिति'**

अत्र प्राजापत्यविवाहे सहधर्मचरतामिति परिभाष्य: कन्यादानमिति ब्राह्मादिविवाहेभ्यः प्राजापत्यविवाहेऽस्मिन् विशेष: परिलक्ष्यते यत् – "सहधर्मचरताम्' इति मन्त्र: वरकन्य मिलित्वा गृहस्थाश्रमधर्मस्य पालनं कुरुत इति प्रतिपादयति'' ।
प्राजापत्यविवाहोढायाः पुत्रः षट् पित्रादीन् षट् पुत्रदीन चैनसो मोचयतीति पूर्वस्यैव सर्वत्रानुषङ्गः।

**ब्रह्मादिषु विवाहेषु चतुर्वेसवानुपूर्वशः**
**ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः॥ इति ॥**

ब्राह्म-दैव-आर्ष-प्रजापत्यादिषु चतुर्षु विवाहेषु क्रमावस्थितेषु श्रुताध्ययनसंपत्तिकतेजोयुक्ताः पुत्राः शिष्टप्रिया जायन्ते।

**इतरेषु त शिष्टेषु नृशंसानृतवादिनः।**
**जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥ इति ॥**

**आसुरो विवाहः –**
कन्यायाः ज्ञातिभ्यः पित्रादिभ्यः तथा कन्यायै यथाशक्तिः धनं दत्वा स्वेच्छया । कन्याग्रहणं आसुर: विवाहः इत्युच्यते ।
अत्र मनुना प्रक्तम् –

**ज्ञातिभ्यो चरतां धर्ममिति वाचानुभाष्य च।**
**कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥ इति ॥**

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै यद्यथाशक्ति धनं दत्त्वा कन्याया अप्रदानमादानं स्वीकारः स्वाच्छन्द्यात्स्वेच्छया न त्वार्षा इव शास्त्रीयधनजातिपरिमाणनिमेन स आसुरो विवाहः उच्यते।
अत्र याज्ञवल्क्यस्मृतिः –

**आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः ।**
**राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ॥**

**गान्धर्व विवाहः –**
कन्या-वरयो: स्वेच्छया परस्परं प्रीत्या वायो विवाहः स गान्धर्वः । याज्ञवल्क्येन -'गान्धर्वः समयान्मिथः'' इति उल्लिखितम् ।
अत्र मनुः वदति –

**इच्छायान्योन्यसंयोगः कन्यायाश्च वरस्य च।**
**गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः। इति ॥**

कन्याया वरस्य चान्योन्यानुरागेण यः परस्परसंयोग आलिङ्गनादिरूपः स गान्धर्वो ज्ञातव्यः। संभवत्यस्मादिति संभवः यस्मात्कन्यावरयोरभिलाषादसौ संभवाति। अत एव मैथुन्यो मैथुनााय हितः। सर्वविवाहनामेव मैथुन्यत्वेन यदस्य मैथुन्यत्वाभिधानं तत्सत्यापि मैथुने न विरोध इति प्रदर्शनार्थम्।
अत्र याज्ञवल्क्यस्मृतिः –

**आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः।**
**राक्षसो युद्धगरणात्पैशाचः कन्यकाच्छलात्॥ इति ॥**

**राक्षस विवाहः –**
कन्यायाः पित्रादीन् हत्वा वा तेषाम् अंगच्छेदनादीन् कृत्वा वा गृहात् हा पितः हामातः इत्यादि कथनपूर्वकं विलपयन्ती कन्यां बलात्कारेण आनीय यो विवाहः अनुष्ठीयते स राक्षसो विवाहः इति कथितः । तस्य लक्षणप्रसंगे मनुना श्लोकोऽयं विरचितः यत् –

**हत्वा छित्त्वा च भित्त्वा च क्रोशान्ती रूदती गृहात्।**
**प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ इति ॥**

प्रसह्य बलात्कारेण कन्याया हरणं राक्षसो विवाह इत्येव लक्षणम्। यदा तु हर्तुः शक्तयतिशयं ज्ञात्वा पित्रादिभिरुपेक्ष्यते तदा नावश्यकं हननादि। यदि कन्यापक्षः प्रतिपक्षतां याति तदा हननादिकमपि कर्तव्यमित्यर्थप्राप्तमनूद्यते। कन्यापक्षान्विनाश्य तेषामङ्गच्छेदं कृत्वा प्राकारादीन्भित्वा - "हा पितांतरनाथाहं ह्रिये" इति वदन्तीमश्रूणि मुञ्चन्तीयत्कन्यां गृहादपहरति। अनेन कन्यायामनिच्छोक्ता गान्धर्वाद्विवेकार्थम्।

**पैशाचविवाहः –**
सुप्ता, मत्तां प्रमत्तां स्वस्य शरीर रक्षितुमसमर्था प्रमादयुक्त वा एवं भूतया कन्यया । साकं यत्र विवाहः क्रियते। स सर्वेषु विवाहेषु निन्दितः पैशाचविवाहरिति प्रचक्षते। विषयेऽस्मिन् यथाह मनु –

**सुत्पां मत्तां प्रमत्तां वां रहो यत्रोपगच्छति।**
**स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥**

निद्राभिभूतां मद्यमदविह्वलां शीलसंरक्षणेन रहिता विजनदेशे यत्रविवाहे मैथुनधर्मेण प्रवर्तते स पापहेतुर्विवाहानां मध्येऽधमः पैशाचः ख्यातः।
एवं प्रकारेण अष्टाविवाहाः मनुनांनिर्दिष्टाः । वसिष्ठस्तु षट् प्रकार विवाहान् आह । मनुमतेन यः राक्षासविवाहः वसिष्ठमतेन सः क्षत्रः विवाहः । पुनश्च आसुरविवाहस्य नाम वसिष्ठमतेन मानुषविवाहः प्रजापत्यपैशाचविवाहौ तेन न प्रदर्शितै। ब्राह्मादि उत्कुष्टविवाहेषु धार्मिकाः शीलवन्तः दीर्घायुः वश्यपुत्राः जायन्ते। आसुरादि विवाहषु हातो विपरिताः जायन्ते ।
इतिशम्।।

**अनुशीलितग्रन्थाः**
- मनुस्मृतिः
- याज्ञवल्क्यस्मृतिः
- मिताक्षरटीका
- तैत्तिरीयब्राह्मणः
- गौतमधर्मसूत्रम्
- बौधायनधर्मसूत्रम्

**References**

1. या.स्मृ. - 1 / 51
2. म. स्मृ. - 3/4
3. या. स्म. - 1/53
4. म. स्मृ. - 3/5
5. गौ. ध. सू - 1/4 /3
6. तै.ब्रा. २/२/२/१३
7. व. ध . ८ /१३ / १४ - १६
8. मनु. स्मृ. - ९/२७
9. मनु. स्मृ. - ९/२८
10. या . स्मृ. - १/७८
11. मनु. स्मृ. - ३/२१
12. मनु.स्मृ, ३/२७
13. गो. ध. सू - 1/4/4
14. या. स्मृ. - 1/58
15. म. स्मृ. -3/37
16. या स्मृ. - 1/58
17. मनु.स्मृ, ३/३७
18. या. स्मृ. - 1/59
19. मनु.स्मृ, ३/२८
20. मनुस्मृ, ३/३८
21. गो. ध, सू - 1/4/7
22. म. स्मृ. - 3 / 38
23. याज्ञ/आचारध्यायः/विवाहप्रकरण - ५९
24. मनु.स्मृ, २/२९
25. मनुस्मृ, ३/३०
26. मनुस्मृ, ३/३९
27. मनु.स्मृ, ३/४१
28. मनु.स्मृ, ३/३१
29. याज्ञ/आचारध्यायः/विवाहप्रकरण - ६१
30. मनु.स्मृ, ३/३२
31. याज्ञ/आचारध्यायः/विवाहप्रकरण - ६१
32. मनुस्मृ, ३/३२
33. मनुस्मृतिः, ३/३४